

DELHI UNIVERSITY
LIBRARY

Presented by
SHRI UMESH DUTT SHARMA
in Memory of his Father
Late Pt. HAR DUTT SHARMA
Retired Sanskrit
Teacher, University of Delhi

DELHI UNIVERSITY LIBRARY

Cl. No. Q 2 : 417 x 1566

Date of release for loan

Ac. No. 82109

This book should be returned on or before the date last stamped below. An overdue charge of one anna will be charged for each day the book is kept overtime.

श्रीः

स्तुतिकुसुमाञ्जलिः

अयं ग्रन्थः

निवृत्तमहीशूरदेशीयसंस्कृतशालोपद्रष्ट्रपदेन

श्रीवेंकटरमणार्येण

विरचितः

राजचरितविशारद राव्साहेब्

इति विरुदाङ्कितानां

सि. हयवदनरायमहाशयानां

पुरोवचनेन समलंकृतश्च

वेगळूरुनगरस्थ वेगळूरुमुद्राक्षरशालाया संमुद्रितः सन्

विजयतेतराम्

१९३६

सर्वेऽधिकारा. स्वायत्तीकृताः

विषयसूची

		पृष्ठसंख्या
१.	श्रीचामुण्डेश्वरीवर्णमाला	१
२.	श्रीचामुण्डेश्वरीवर्णमालास्तुतिः	५
३.	श्रीकृष्णराजप्रशस्तिः	९
४.	विज्ञापना	११
५.	श्रीसुब्रह्मण्यस्तोत्रम्	१३
६.	श्रीचतुर्मुखब्रह्मस्तोत्रम्	१५
७.	श्रीवेंकटरमणस्तोत्रम्	१८
८.	श्रीश्रीनिवासस्तवः	२१
९.	श्रीरुक्मिणीकृष्णस्तोत्रम्	२४
१०.	श्रीसोमनाथस्तवः	२७
११.	श्रीविश्वनाथस्तवः	३१
१२.	श्रीवाणीनवमालिका	३३
१३.	कमलास्तुतिः	३५
१४.	गिरिजास्तुतिः	३८
१५.	श्रीगङ्गाष्टकम्	४१

पुरोवचनम्

विविधतत्त्वार्थसम्पूरितः स्तुतिकुसुमाञ्जल्यभिधोऽयं ग्रन्थः नवीनैर्विरचितोऽपि प्राचीनकृतरीतिं कात्स्न्र्येनानुसरति। अद्वैत-मततत्त्वभूयिष्ठोऽय वेदान्तरहस्यजिज्ञासूनां मुमुक्षूणामात्मावबोधं द्रुतं जनयति। सहृदयहृदयरञ्जक च्छन्दोनिबद्धानतिबहुलपद्यैस्तत्तैरलंकृतश्च पिपठिषूणां बालकानामुत्साहमुत्पादयति। अतः इमं ग्रन्थं सर्वे मानवा अवश्यं पठित्वाऽऽध्यात्मिकज्ञानमेदुरा भगवत्प्रसादार्जनद्वारा ग्रन्थकृतां श्रीमतां वेकटरमणार्याणां श्रमं सफलयेयुरिति विश्वसिमि।

बेंगळूरु,
७–२–१९३६.

सि. हयवदनराव्।

प्रस्तावः

विदितमिदं सर्वेषां धर्मचारिणां यन्मोक्ष एव मनुष्याणां परमपुरुषार्थ इति । मोक्षश्च जननमरणात्मकसंसारबन्धनिवृत्तिरूपः । तादृशनिवृत्तिः भगवदनुग्रहादेव लभ्यते । भगवदनुग्रहस्तु भगवदाराधनद्वारा संपादनीयः । भगवदाराधनं पुनः अनेकधा आम्नायते । तत्र, चित्तैकाग्र्येण भगवत्स्तोत्ररूपमाराधनमतिसुलभं सर्वजनसाध्यं च भवति । तस्मादस्मिन् "स्तुतिकुसुमाञ्जलि" नामके ग्रन्थे स्तोत्ररूपाराधनोपायः यथोचितं निबद्धः । यद्यपि भगवान् परमात्मा कीदृश इति निर्णेतुमशक्यम्, तथापि सत्यज्ञानानन्दात्मकः स एकोपि भक्तानुग्रहार्थं विविधनामरूपोपपन्नो भवति ।

तत्र समीचीनब्रह्महितरूपः सुब्रह्मण्यः, ऋग्यजुःसामाथर्वात्मकचतुर्वेदरूपः चतुर्मुखब्रह्मा, सकलपापरिहारकः वेंकटरमणः, समस्तविघ्नघनशुभोदर्कनिवासभूतः श्रीनिवासः, सर्वप्राणिनामखिलकष्टनिवृत्तिहेतुभूतः लक्ष्मीरमणो रुक्मिणीकृष्णः, सोमप्रधानभूतयज्ञपतिः, अथवा सकलजगत्प्रकृतिभूतायाः उमाख्यपरदेवतायाः प्रेरकः पालको वा सोमनाथः, समस्तजगतां प्रभुः विश्वेश्वरः, ज्ञानशक्तिरूपा जगज्जननी सरस्वती, इच्छाशक्तिरूपा जगन्माता कमला, क्रियाशक्तिरूपा जगदम्बा गिरिजा, भूलोकवासिनां सकल पापापनोदनक्षमा भगवती सुरसरित् गङ्गा—इति मत्याऽऽकलय्य

परमात्मनः एकादशरूपाणामेतेषां महामहिमा स्तोत्ररूपेणात्र संग्रथितः ।

एतत्पठनेन साधकानां चित्तपरिपाकद्वारा सकलाभीष्ट-फलसिद्धिर्भवेदिति मदीयाऽऽकाङ्क्षा भगवत्प्रसादेन सफलीभूयादिति सर्वं शिवम् ॥

श्रीवेंकटरमणार्यः,
ग्रन्थकर्ता ।

युवसंवत्सर
माघ शुक्ल पूर्णिमा भृगुवासरे ।

॥ श्रीः ॥

स्तुतिकुसुमाञ्जलिः

देवताप्रार्थना

१. श्रीचामुण्डेश्वरीवर्णमाला

(वृत्तम्—गीतिः)

अजहरिहरमुखदेवै-
राश्रिततत्त्वं सदेव देवि त्वम् ।
इभमुखजननीमार्या-
मीडे चामुण्डिकाम्ब जनानि त्वाम् ॥ १ ॥

उरगविभूषार्धाङ्गी-
मूर्जितमहिमात्तसृष्टिचातुर्याम् ।
ऋषिगणचिन्तितरूपा-
[1]मृणाति मनो ममाम्ब नित्यं त्वाम् ॥ २ ॥

[2]ॡपदार्थामरजननीम्
[3]ॡदेवप्रियनितम्बिनीं वन्दे ।
एकां सच्चिद्रूपा-
मैक्यात्मार्थामवैमि मनसा त्वाम् ॥ ३ ॥

---

[1] गच्छति (ऋ गतौ) ।

[2] देवमाता ।

[3] ईश्वर. ।

ओंकारार्था कलया-
म्यौपाधिकभेदवर्जितामम्बाम् ।
ओंपदवर्णा ये ते
सोल्कण्ठास्सन्त्युमापदे शक्ताः ॥ ४ ॥

अम्ब त्वं सम्मोदा-
[1]दः प्रीता ह्यसि चेन्ममार्तोक्त्या ।
सर्वस्वरवर्णयुता
धावेयुर्मे मनोरथाः सत्यम् ॥ ५ ॥

कविबुधबुद्धयालम्बे
स्वरन्तरकिल्बिषविधूननालम्बे ।
गगनमिव निगालम्बे
घनवदमृतवर्षिणीं समालम्बे ॥ ६ ॥

डिलेडप्रत्याहारे
चरसि त्वं खलु [2]डवाच्यदेवात्मा ।
छन्नानि चण्डनिहन्त्री
जयसि त्वं निहतचण्डचामुण्डा ॥ ७ ॥

---

[1] अयमनुकरणशब्दः (निपातः) ।

[2] यथा घनः मेघः, अमृतं जलं, वर्षति, तद्वत् त्वं, चिदाकाशस्था, सहस्रारकमलरूपात् चन्द्रमण्डलात् अमृतम् आनन्दरसं वर्षसि कार्यकारणसंघातं चैतन्ययुक्तं करोषि इत्यर्थः । अथवा भक्तानां मोक्षप्रदायिनी, आनन्ददायिनी भवसीत्यर्थः ॥

[1] डवाच्यदेवः ईश्वरः ।

[7]ञ्ञशिञ्छित्तल्यास्ते
अनुनासिक्यो विमूर्च्छति ध्वानः ।
टकारादनुपस्ते
[8]टः पतति खलारिर्धैर्यशौर्याद्यम् ॥ ८ ॥
[9]डमरुजशब्दो भर्तु-
र्ढक्कानादेन संवदत्यार्ये ।
णपदार्थो ज्ञानं त्वं
[10]तक्षसि [11]गौरी महस्रधा [12]सलिलम् ॥ ९ ॥
[13]थल्थलभासा लोका
दर्शनयोग्यास्तवेन्दुर्वावेदीमाः ।
धर्मं रक्षसि चित्र
नेति व्यावृत्तसर्वधर्मा त्वम् ॥ १० ॥
[14]परमात्माम्बासि त्वं
फलमसि धर्मार्थकाममोक्षाणाम् ।
बलमसि भाग्यानां त्वं
भवभीहरणे मनोऽस्तु ते चरणे ॥ ११ ॥

---

7 § डमावनुकरणशब्दौ (निपातौ) ।
9 भंग्यानृत्तकाले ।
10 प्रपञ्चयसि ।
11 सरस्वतीरूपा ।
12 ज्ञानम् ।
13 तस्य भासा सर्वमिदं विभातीति श्रुतेः ।
14 सच्चिदानन्दरूपिणी (इति ललितासहस्रे प्रसिद्धम्) ।

मन्मथवैरिशरीरे
स्पर्शास्ते पञ्चविंशतत्त्वाख्याः ।
यमनियमादिषु चित्तं
रमतेऽत्र सतां भवानि ते प्रीत्या ॥ १२ ॥

त्वमसि त्वं वैराग्ये
वससि यथा भोग्यवर्गसंसर्गे ।
शंकरि शाम्भवि तनु श
षण्मुखमातः षडिन्द्रियायोग्यम् ॥ १३ ॥

संतनसंस्मृतिमाया
हर हरजाये नमामि मायां ते ।
क्षः कषयोगात्त्वमजा
ज्ञो जञ्योगात्त्वमेव विज्ञानम ॥ १४ ॥

सर्वे व्यञ्जनवर्णाः
सर्वेश्वरि ते चिदंशतो जाताः ।
मातस्ते पदपद्मे
झंकुर्वन्त्यमृतपानसंतुष्टा. ॥ १५ ॥

श्रीचामुण्डेश्वरि ते
कृपया कलितां सुवर्णमालां त्वम् ।
श्रीवेंकटरमणायां
कण्ठे धृत्वा वसाम्ब हृदये मे ॥ १६ ॥

---

२. श्रीचामुण्डेश्वरीवर्णमालास्तुतिः

(षोडशमात्रावृत्तम्)

चामुण्डेश्वरि चामुण्डेश्वरि
चामुण्डेश्वरि पालय माम् ।
आनन्देश्वरि शिवकामेश्वरि
जय परमेश्वरि [1]शीलय माम् ॥

ब्रह्मविकासिनि विष्णुनिवासिनि
शम्भुविलासिनि तत्त्वरमे ।
सृष्टिविधायिनि रक्षणधारिणि
संहृतिकारिणि श कुरु मे ॥ चामुण्डेश्वरि० ॥ १ ॥

[2]गिरिधरसोदरि [3]गिरिवरजोदरि
[4]गिरिशयुतोदरि कि कुरुषे ।
भवभयहारिणि भवजविहारिणि
भवजयकारिणि [5]किंपुरुषे ॥ चामुण्डेश्वरि० ॥ २ ॥

---

[1] मां शीलवन्तं कुरु ।

[2] गिरिधरः=गोवर्धनधरः कृष्णः, अथवा मन्दरधरः विष्णुः, तस्य सोदरी=सहोदरी । यथा 'श्रीनाथसोदरीभूतचित्कला' ।

[3] गिरिवरः=हिमालयः, तस्माज्जातम् उदरं (शरीरं) यस्याः । हिमालयतनयेत्यर्थः ।

[4] गिरिशः=ईश्वरः, तेन युतम् उदरं (शरीरं) यस्याः । यथा शंकरार्धाङ्गशरीरा इति ललिताष्टोत्तरे ।

[5] कुत्सितः पुरुषः, किंपुरुषः, अल्पः इति यावत्, तस्मिन् मयि ।

सुरनरपालिनि शरभरशालिनि
परवरमालिनि बोधय माम् ।
मतिहितदायिनि कुशलविधायिनि
[1]कृतफलदायिनि चोदय माम ॥ चामुण्डेश्वरि० ॥ ३ ॥

भरतमहाभुवि [2]चरितमहद्यवि
[3]भरितमहागवि संक्रमसे ।
महितमहायक महितमहोदय
विहितमहैर्भुवि संध्रियसे ॥ चामुण्डेश्वरि० ॥ ४ ॥

गर्हितमहिषासुरवरमर्दिनि
चर्वितबलिनी मोदयसे ।
[4]गर्वितचामुण्डासुरमर्दिनि
सर्वमरिभ्यो मोचयसे ॥ चामुण्डेश्वरि० ॥ ५ ॥

---

[1] अत्र कमसंज्ञकसंयुक्तवर्णात् पूर्वलघुवर्णस्य "नि" कारस्य गुरुत्वं न भवति । एतच्छ्रुतगुरुतत्त्वं वृत्तरत्नाकरे केदारनाथेन उदाहृतम् । यथा "सुन्दरि ग्राम्यजनो मृष्टमश्नाति" इति ।

[2] चरिता. महाः यस्यां सा चरितमहा । चरितमहा द्यौः यस्यास्सा । भारतभूः अन्तरिक्षव्याप्तयागादिमहोत्सवसमारम्भयुक्तेत्यर्थः ।

[3] महत्यः गावः (वाचः) महागव्यः, भरिताः महागव्यः यस्यां सा । भरितमहागवी. तस्याः संबुद्धिः । वेदवेद्यदेवीत्यर्थः ।

[4] गर्ह निन्दायाम्, कर्मणि क्तः, निन्दितः इत्यर्थः ।

[10] गर्व धातोः कर्तरि क्तप्रत्ययः । अथवा गर्वो जातोऽस्येति "तारकादिभ्यो इतच् वा" यथा—"कोऽर्थान् प्राप्य न गर्वितः" (भर्तृहरिः) ।

प्राग्दिशि महिषासुरनगरस्य
क्षमाभृति वासं त्वं कुरुषे ।
चामुण्डाचलनामकशैले
जलसुमदीपैस्त्वं रमसे ॥ चामुण्डेश्वरि० ॥ ६ ॥

यदुकुलभूपतिपरकुलदैत्य
शुभकुलमार्गं पासि मुदा ।
यदुकुलरक्षिणि खलकुलभक्षिणि
यदुकुलनृपतीन् पाहि सदा ॥ चामुण्डेश्वरि० ॥ ७ ॥

तव कृपयालं घनकनकाल-
कृतवसुधालं भूतिकृते ।
[11]भव हृदये लङ्घितबहुनाल-
बुद्धिमतोऽलं लोकहिते ॥ चामुण्डेश्वरि० ॥ ८ ॥

कृष्णनरेन्द्रं वृष्णिकुलेन्दुं
विष्णुमहीन्द्रं पाहि चिरात् ।
वृष्टिभिरेषा दृष्टिविभूषा
सृष्टिविशेषा भूर्जयतात् ॥ चामुण्डेश्वरि० ॥ ९ ॥

---

[11] हे लोकहिते, लङ्घितबहुनालंबुद्धिमतः, पुंसः, हृदये, अलं भव (संपूर्णतया गच्छाधि कुरु) इत्यन्वयः । न अलं बुद्धिः=नालंबुद्धिः, असंतुष्टिरित्यर्थः । बहुप्रकारा सा बहुनालंबुद्धिः । लङ्घिता (त्यक्ता) च सा बहुनालंबुद्धिश्च । सा अस्मिन्नस्तीति लङ्घितबहुनालंबुद्धिमान्, तस्य संतुष्टहृदयस्येत्यर्थः ।

स्तुतिमवधारय चामुण्डेश्वरि
मम रचितामिह ते कृपया ।
स्तुतमयनं नय वैकटरमणं
सुखमयि मामयि ते दयया ॥ चामुण्डेश्वरि० ॥ १० ॥

३. श्रीकृष्णराजप्रशस्तिः

(वृत्तम्—गीति.)

धरणीन्द्र गुणसान्द्रं
जनतावनधीरशूरकृष्णेन्द्रम् ।
निजसेवाकालितोऽहं
विनतो हृदि भावयामि भक्त्या त्वाम् ॥ १ ॥

स्तुतकर्णाटकदेशे
महिषासुरपत्तनाख्यनगरे त्वम् ।
स्तुतसिंहासनमध्ये
विलसन्परिसेवसेऽत्र चामुण्डाम् ॥ २ ॥

नवराज्यं तव राज्यं
वरशासनतो विभाति सुश्लाघ्यम् ।
जलराशिः फलराशि-
र्धनधान्यसमृद्धिरत्र विविधाऽऽस्ते ॥ ३ ॥

कनकायोमुखलोहा
जलविद्युदवाप्तशक्तिदीपालिः ।
वसुधायो वसुदायो
वसुधेति समस्तवस्तुसंपूर्णा ॥ ४ ॥

मृगसान्द्रो वनदेशो
घनकृत्तरुगुल्मवेणुघासाद्यः ।

पशुसान्द्रो जनदेशो
　　विनुतापणसान्द्रवीथिवाणिज्यः　　॥ ५ ॥
वरविद्याश्रयशाला
　　बहुधा विहिता विहारभूयुक्ताः ।
नरवर्याः परधैर्यात
　　प्रतिभागुणशालिनो विराजन्ते　　॥ ६ ॥
ऋतुधर्मः कृतशर्मा
　　हिनशीतोष्णजगुणेन सर्वामः ।
अत एव प्रतिदेशा-
　　दिह वासपरः प्रयाति मर्त्यौघः　　॥ ७ ॥
जनवर्गप्रियभाक् त्वं
　　समवर्तननोऽखिलेषु सुप्रेमा ।
नृपवर्गप्रियभाक् त्वं
　　विनयार्जितसार्वभौमहृत्प्रेमा　　॥ ८ ॥
सुरदेवो भुवि दद्यात
　　कुशलं हिनदीर्घमायुरारोग्यम् ।
स्थिरकीर्तिं सुरमूर्ते
　　वरकृष्णमहीन्द्र वाञ्छित तुभ्यम्　　॥ ९ ॥
गुणलोभान्नृपभक्त्या
　　कलितां नवमालिकामेनाम् ।
करमूर्ता करवाण्यथ
　　कुरु ते नयनेऽत्र वेंकटार्य माम्　　॥ १० ॥

४. विज्ञापना

(वृत्तम्—गीतिः)

वाणीमेवा कर्तुं
कृतयो रचिता मयाऽत्र निर्व्याजम् ।
मुद्रणशोभाकलिताः
प्रकटितविभवा भवेयुरित्याशा ॥ १ ॥

सद्विश्वांसितरूपं
कमलाविजयाख्यनाटकं नव्यम ।
सर्वहितो नवगीता-
कुसुमाञ्जलिरामदेवमहिमार्थः ॥ २ ॥

काव्यमुमादर्शाख्यं
दिव्यं कल्पितचरित्रैर्विचित्र्यम ।
स्तुतिकुसुमाञ्जलिरिष्ट-
च्छन्दोग्रन्थोऽस्ति सर्वसमवृत्तः ॥ ३ ॥

चम्पूभङ्ग्या रचित
संस्कृतविद्याभिवृद्ध्युपाख्यानम् ।
सन्त्यन्ये सङ्कीर्णा
ग्रन्थाः समयोचितार्थसंदर्भाः ॥ ४ ॥

प्रभवो न स्मयदृष्टा
न हि बोद्धारोऽत्र मत्सरग्रस्ताः ।

नान्येऽबोधोपहताः
　　कथमङ्गे स्यात्सुभाषितं जीर्णम्　　॥ ५ ॥

इति मत्वा मत्कृतयो
　　राजन्सुधियेऽद्य ते निवेद्यन्ते ।
यदि सारो विदितः स्या-
　　त्तन्मम भारो विमुच्यते हार्दः　　॥ ६ ॥

मद्ग्रन्थान सपदीमान्
　　प्रीत्याऽहं ते समर्पये प्रभवे ।
यदि तुष्टिस्तद्दृष्टे-
　　र्विलसन्त्यपरे नवान्तिके मोदात्　　॥ ७ ॥

वृद्धो निर्धनशक्तो
　　राजंस्त्वद्देशलब्धजन्माऽहम् ।
एवं वेंकटरमणो
　　धीरं विज्ञापयामि विनयात्त्वाम्　　॥ ८ ॥

---

५. श्रीसुब्रह्मण्यस्तोत्रम्

(षोडशमात्रावृत्तम्)

सुब्रह्मण्य सुब्रह्मण्यं
सुब्रह्मण्यं भज त भज रे ।
[1]अब्रह्मण्यं [2]विब्रह्मण्यं
न ब्रह्मण्ये भज तं भज रे ॥
[3]काले मृत्युः [4]काले देवः
काले विहितं भज तं भज रे ।
काल हित्वा कालं त्यक्त्वा
कालात्मान भज तं भज रे ॥ सुब्र० ॥ १ ॥
[5]बाले वृद्धो मध्ये नाहं
मूढो विद्वानिति तं भज रे ।
याऽवस्था वा स्यात्त्व तस्या-
मात्मावस्थ भज त भज रे ॥ सुब्र० ॥ २ ॥
मायारूप सर्व ज्ञात्वा
तत्त्वज्ञानाद्भज त भज रे ।

1, 2. ब्रह्मण्ये=ब्रह्मभूते सुब्रह्मण्ये (वर्तमाने सति), अब्रह्मण्यं=ब्रह्म व्यतिरिक्तं यत्, विब्रह्मण्यं=विपरीतब्रह्मभूतं यत् तन्न भज, किंतु तमेव सुब्रह्मण्यं भज।

3, 4. कालः यथैवोपयुज्यते तथैव प्रयोजनको भवतीति भावः ।

5. अहं बालः=भगवद्भजनासमर्थः, वेदान्तविचाराय मम नायं कालः-इत्युपेक्षामकृत्वा तं भज । एवमेव सर्वत्र । अयमर्थः उत्तरार्धेन स्पष्टो भवति ।

[1]मायान्यो यः कायापाये
भद्रोपायं भज तं भज रे ॥ सुब्र० ॥ ३ ॥

गौर्गपुत्रं सुब्रह्मण्यं
[2]गौर्गीनाथं सतत भज रे ।
[3]रामातनयं ब्रह्मण्यं [4]श्री-
रामारमणं भज त भज रे ॥ सुब्र० ॥ ४ ॥

वार्णाप्राण मायाधीशं
वल्लीदेवीकान्तं भज रे ।
त्रिगुणातीतं सच्चित्कन्दं
ब्रह्मानन्दं भज तं भज रे ॥ सुब्र० ॥ ५ ॥

वेंकटरमणेनेद रचितं
सुब्रह्मण्यस्तोत्रं भक्त्या ।
श्रवणान्मननाद्ध्यानादस्य
प्राप्नोत्यखिलं मनुजः सततम् ॥ सुब्र० ॥ ६ ॥

---

[1] कायापाये देहापायसमये, मायायाः, अन्यः य. स एव सकलश्रेयसां मुक्तेश्च उपायभूतः भवतीति अभिप्राय. ।

[2] गौर्गीनाथस्य ईश्वरस्यापि ब्रह्मण्यशब्दप्रयोगोऽस्ति (यथा शिवसाहस्रे) ।

[3] रामातनयः देवकीपुत्रः श्रीकृष्णः, स एव ब्रह्मण्य', यथा "ब्रह्मण्यो देवकीपुत्र" इति स्मरणात् ।

[4] लक्ष्मीरूपा या स्त्री, तस्याः रमणः कान्त. विष्णुरित्यर्थः, विष्णोरपि ब्रह्मण्यशब्दः अन्वर्थ एव । यथा विष्णुसाहस्रे "ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा" इति ।

६. श्रीचतुर्मुखब्रह्मस्तोत्रम्

(वृत्तम—भुजङ्गप्रयातम्)

भजे ब्रह्ममूर्तिं चतुर्वक्त्रमूर्तिं
भजे ब्रह्ममूर्तिं भजेऽहं सदा त्वाम् ।
भजे श्रीविरिञ्चिं भजे श्रीविरिञ्चिं
भजे श्रीविरिञ्चिं भजेऽहं मुदा त्वाम् ॥

सदानन्दमूर्तिं चिदानन्दमूर्तिं
शतानन्दमूर्तिं भजे विश्वमूर्तिम् ।
यतः सृष्टिरक्षाविनाशादिकार्यं
भवेत्त महेशं सुरज्येष्ठदेवम् ॥ १ ॥

भजे वाक्पतिं त्वां भजे धातृमूर्तिं
भजे श्रीपतिं तं भजे विष्णुमूर्तिम् ।
तथोमापतिं त भजे शम्भुमूर्तिं
त्रिशक्त्या युत त्वा त्रिमूर्तिं भजेऽहम् ॥ २ ॥

त्रिमूर्तिस्वरूपं भजे दत्तमूर्तिं
भजेऽहं भजेऽनन्तमूर्तिं विधिं त्वाम ।
त्रिकालात्मकं त्वां त्रिकालाद्यतीत
समायाविलासं द्यविद्याविनाशम् ॥ ३ ॥

अरूप परब्रह्म यत्तत्त्वदार्थं
सरूपं भजे ब्रह्मनामाभिधेयम् ।

अतस्त्वां भजन्त्यप्रमेयं सुपूज्यं
सदाराधयन्ति प्रियं भक्तिभावात् ॥ ४ ॥

सहस्रं शिरांसि ब्रवीति श्रुतिस्ते
सहस्रं च नेत्राणि पादाः सहस्रम् ।
मुखान्येव चत्वार्यथाप्यद्वयोनि-
स्त्वमेवेति माहात्म्यमत्यद्भुतं ते ॥ ५ ॥

यथा वा भवेस्त्वं न जाने विभो त्वां
मदैकत्वबुद्ध्या भजे हंसवाहम् ।
परं तत्त्वमेकं द्वितीयं यदि स्या-
ददृश्यं न तत्त्वं तदाभासमात्रम् ॥ ६ ॥

तव ब्रह्ममूर्त्तेर्न पूजा विशेषा-
दिति भ्रान्तिरेषा जनानां हि लोके ।
यतस्त्वं हि सर्वस्ततः सर्वपूजा
भवेदेव पूजा तवैवेति बुद्ध्या ॥ ७ ॥

परोक्षप्रियास्ते हि देवाः परं तु
त्वमेवापरोक्षप्रियोऽसि प्रसिद्ध्या ।
अतोऽहं हृदि त्वां भजाम्यादिदेवं
स्वयं मेऽत्र साक्षाद्भव प्रत्यगात्मन् ॥ ८ ॥

पिता त्वं जनानां सुतानां सुतोऽहं
प्रशिक्षस्व मां त्वं सुसामान्युपायैः ।

कृतं चेत्स्वकृत्य त्वयाऽतः स्वधर्मा-
दहं ते प्रिय यत्करोमि स्वकृत्यम् ॥ ९ ॥

सुवद्धं स्ववत्सं यथा धेनुमाता
स्वय धावति प्रेमभावात्तथेमम् ।
भवे पाशवद्धं दयाम्भोनिधे त्व
सुत मां निरीक्ष्य स्वयं सनिधत्स्व ॥ १० ॥

इमां ब्रह्मणस्ते स्तुति वेकटार्यो-
ऽर्पयित्वा पदे ते पदं तद्भजेऽहम् ।
सुतुष्टोऽनया त्वं दयालो दयस्व
प्रपन्ने मयीत्थं कुरु त्वं प्रसादम् ॥ ११ ॥

७. श्रीवेंकटरमणस्तोत्रम्

(षोडशमात्रावृत्तम्)

वेंकटरमण वेंकटरमणं
वेंकटरमणं भज तं भज रे ।
वेंकटरमणं संकटहरणं
वेंकटरमणं भज तं भज रे ॥
वेदविनुतं मन्दरधरणं
धात्रीभरणं बालकशरणम् ।
बलिमुखवरणं नृपबलहरणं
सुररिपुमरणं रिपुजनशरणम् ॥ वेंकट० ॥ १ ॥
जनहितकरुणं कलिबलजरणं
[1]दशकृतिकरणं शुभकरचरणम् ।
[2]कायास्तरणं मायावरणं
रक्षाकरणं ज्ञानाभरणम् ॥ वेंकट० ॥ २ ॥
शुभदं सुखदं गौरीशुभवं
धनदं वरदं लक्ष्मीसुधवम् ।
हितदं मतिदं वाणीविभवं
फलदं बलदं जगतीप्रभवम् ॥ वेंकट० ॥ ३ ॥

---

[1] कृतयः = आकृतयः, अवतारा इति यावत् ।

[2] कायशब्देन कार्योपादानभूता प्रकृतिरत्र विवक्षिता ।

केचिच्छम्भुं केचिद्विष्णुं
केचित्स्कन्दं केचिच्छक्तिम् ।
दृष्ट्वा मूर्तौ चिह्नानि जना
बहुधाऽऽहुस्तं कलयं सर्वम् ॥ वेंकट० ॥ ४ ॥

मूर्तममूर्तं सगुणं ह्यगुणं
चिदचिद्रूपं सदसद्रूपम् ।
ज्ञानाद्भक्त्या वैराग्येण
प्राप्य यत्तद्वस्तु ह्येकम् ॥ वेंकट० ॥ ५ ॥

पुरनगरेभ्यः शक्ता भक्ता-
स्तच्चरणाभ्यां धनमाददते ।
वरकरदानेऽशक्ता भक्ता-
स्तत्पदसेवारतिमादधते ॥ वेंकट० ॥ ६ ॥

कपिलाख्याने स्तुतगोविन्दे
मतिमाधत्ते प्रथमं जनता ।
वरगतिसक्ता दोलायुक्ता
पदगतिरक्ताऽऽरोहति शैलम् ॥ वेंकट० ॥ ७ ॥

पापविनाशिन्यादिषु शैले
प्रथमं तीर्थेष्ववगाहन्ते ।
कृत्वा भक्ताः स्वोचितकर्मा-
ण्यादिवराहं परिसेवन्ते ॥ वेंकट० ॥ ८ ॥

वेंकटरमणस्वामिनमेते
बहुभिर्विभवैरथ सेवन्ते ।
वितरति करुणासिन्धुर्देवो
मनिहितमुवरान्तुभ्यस्तेभ्यः ॥ वेंकट० ॥ ९ ॥

वेंकटरमणस्वामिस्तोत्रं
वेंकटरमणोऽहमयं भक्त्या ।
वेंकटरमणायार्पय एत-
द्वेंकटरमणः प्रीतो भूयात् ॥ वेंकट० ॥ १० ॥

---

८. श्रीश्रीनिवासस्तवः

(वृत्तम्—भुजङ्गप्रयातम्)

भजे श्रीनिवास भजे श्रीनिवास
भजे श्रीनिवासं भजेऽहं सदा त्वाम् ।
सदानन्ददेवं सुदानन्ददं त्वां
सदानन्दभावादुदारं भजेऽहम् ॥

श्रिया मोदमानं धिया भासमानं
ह्रिया सेव्यमानं भिया तोष्यमाणम् ।
प्रियास्त्वां भजामि त्वया पालितोऽहं
दयाम्भोनिधे ते दयां प्रार्थयन्सन् ॥ भजे० ॥ १ ॥

महायोगिगम्यं दृढध्यानगम्य
तपोगम्यमाहुर्बुधास्त्वां प्रशस्तम् ।
अतस्त्वं जनानां शरण्यो वरेण्यो
भवेत्कस्त्वदन्यो भवेच्चेद्वद त्वम् ॥ भजे० ॥ २ ॥

जगज्जालमेतन्महामायया ऽऽत्तं
प्रसार्य प्रभोऽनादिसंसारसिन्धौ ।
मनुष्यात्ममत्स्यान् प्रलोभात्सुबद्धान्
समीक्ष्य प्रमोदादहो क्रीडसि त्वम् ॥ भजे० ॥ ३ ॥

जगत्सृष्टिरक्षाप्रणाशादिकार्ये
निदान त्वमेवेति वेत्ति प्रबुद्धः ।

इह खेष्टदाता परे मोक्षदाता
त्वमेवेति मत्वा जनास्त्वां भजन्ते ॥ भजे० ॥ ४ ॥

अनैर्ज्ञानभक्तिप्रपत्तिप्रधानै-
रनेकैः सुमार्गैरलं पूजितस्त्वम् ।
प्रगल्भः प्रमादं प्रदित्सुः प्रमोदात्
प्रबुद्धां प्रतिष्ठां प्रपन्नः प्रभावात् ॥ भजे० ॥ ५ ॥

कदा वाग्विलासः कदा श्रीनिवासः
कदा सोमभासो विभासि त्वमित्थम् ।
कथं तर्हि तत्त्वं सदेकं द्वितीयं
न चेति द्वितीयायुतं त्वां न वेद्मि ॥ भजे० ॥ ६ ॥

विशेषोऽस्ति वा निर्विशेषो न जाने
परं शेषभूपस्तथा शेषशायी ।
इति त्वामशेषा विशिष्टाश्च शिष्टाः
समष्टिं सदैकत्वनिष्ठा भजन्ते ॥ भजे० ॥ ७ ॥

कलत्रार्थपुत्रस्वकार्यादिकाना-
मयोगे वियोगे सुयोगे च भूमौ ।
कराङ्घ्र्यक्षिकुक्षिप्रधानाङ्गकानां
प्रघाते प्रबाधे शरण्यस्त्वमेव ॥ भजे० ॥ ८ ॥

इति त्वां भजन्ते जना लोकगत्या
हरे हे मुरारे विधो विश्वबन्धो ।

विभो वेंकटेश प्रभो श्रीनिवास
प्रपाहि स्वयं मां प्रपन्नं सदा त्वम् ॥ भजे० ॥ ९ ॥

त्वयि श्रीनिवासस्तव श्रीनिवासे-
ऽर्पये वेंकटोऽहं हृदा भावितात्मा ।
इतोऽप्यन्यदस्ति प्रियं चेदकिंचि-
द्भर त्वं स्वयं तन्न मे कापि चिन्ता ॥ भजे० ॥ १० ॥

---

९. श्रीरुक्मिणीकृष्णस्तोत्रम्

(वृत्तं—शालिनी)

लक्ष्मीनाथ लोकनाथं प्रभो त्वां
तेजोमूर्तिं विष्णुनारायणाख्यम् ।
एकं देवं सच्चिदानन्दरूपं
वन्दे कृष्णं रुक्मिणीकेलिलोलम् ॥ १ ॥

भूरक्षार्थं देवकीगर्भजातं
गोपीबाल गोकुलानां शरण्यम् ।
कंसध्वंसं हंसगेड्य मुरारिं
वन्दे कृष्ण रुक्मिणीकेलिलोलम् ॥ २ ॥

कल्याणाढ्यां कुण्डिनीभूपपुत्री-
मुद्वाह्यान्यास्वान्तरङ्गे विहारम् ।
सिन्धोस्तीरे द्वारकारामभूमौ
वन्दे कृष्णं रुक्मिणीकेलिलोलम् ॥ ३ ॥

पार्थप्राणं पूर्णकामं परेशं
गीताशास्त्रात्तत्त्वबोधप्रवीणम् ।
वैकुण्ठाप्तेर्मोक्षसिद्धेर्निदानं
वन्दे कृष्णं रुक्मिणीकेलिलोलम् ॥ ४ ॥

सर्पीणां तापसानां बहूना-
मक्रूरादिस्निग्धसेवापराणाम् ।

भक्तानां त्वां रक्षकं स्वाश्रितानां
वन्दे कृष्ण रुक्मिणीकेळिलोलम् ॥ ५ ॥

द्रौपद्यास्त्व मानदाता गजेन्द्रे
त्वत्कारुण्यं नक्रभीते प्रसिद्धम् ।
यद्भक्ताः स्युर्दुःखमुक्ता हि लोके
वन्दे कृष्णं रुक्मिणीकेळिलोलम् ॥ ६ ॥

माहात्म्य ते रुक्मिणीनाथ मात-
र्वक्तुं के वा पारयेयुर्नितान्तम् ।
वेदान्तार्थाः सर्वदा यत्परास्त्वा
वन्दे कृष्ण रुक्मिणीकेळिलोलम् ॥ ७ ॥

रुक्मिण्यो ते प्रीतिभावो निरूढो
रुक्मिण्याः स्वप्रीतिभावस्त्वयीऽत्थम् ।
अन्योन्यात्तप्रीतिसाराद्रस त्वां
वन्दे कृष्णं रुक्मिणीकेळिलोलम् ॥ ८ ॥

लक्ष्मीरूपां रुक्मिणीं रुक्ममूर्ति
विष्णो रूपं कृष्ण ते कृष्णमूर्तिम् ।
ध्यायंध्यायं निर्मलोऽहं यतस्त्वां
वन्दे विष्णुं रुक्मिणीकेळिलोलम् ॥ ९ ॥

वन्दे विष्णुं कृष्णकारुण्यसिन्धुं
वन्दे लक्ष्मीं रुक्मिणीं भव्यबन्धुम् ।

वन्देऽहं त्वामद्वयं तद्द्वयात्तं
वन्दे कृष्णं रुक्मिणीकेळिलोलम् ॥ १० ॥

यस्मिन् गेहे रुक्मिणीयुक्तकृष्णो
भक्तप्रीतः पूजितो मानसे वा ।
तस्मिंस्त्वं भो रुक्मिणीयुग्मवेस्त्वां
वन्दे कृष्णं रुक्मिणीकेळिलोलम् ॥ ११ ॥

एतत्स्तोत्रं रुक्मिणीकृष्णपात्रं
भक्त्या युक्तं वेंकटार्यप्रयुक्तम् ।
स्मृत्वा स्तुत्वा सर्वसंपत्करं त्वां
वन्दे कृष्णं रुक्मिणीकेळिलोलम् ॥ १२ ॥

---

१०. श्रीसोमनाथस्तवः

(वृत्तं—भुजङ्गप्रयातम्)

भजे सोमनाथं भजे सोमनाथ
भजे सोमनाथं भजे त्वा भजेऽहम् ।
भजे वामदेवं महादेवमाद्यं
भजे व्योमकेशं भजेऽहं भजे त्वाम् ॥

भजाम्यष्टमूर्तिं वशिष्टेष्टमूर्तिं
भजेऽदृष्टमूर्तिं विशिष्टेष्टमूर्तिम् ।
अमूर्तं च मूर्तं यदात्तात्ममूर्तिं
त्रिमूर्त्यात्ममूर्तिं चिदानन्दमूर्तिम् ॥ भजे० ॥ १ ॥

महान्यासमन्त्रैः सरुद्राभिषेकै-
र्महाशैवतन्त्रैः समुद्राभिमन्त्रैः ।
भजन्तीह मर्त्या भवन्ति ह्यमर्त्या
नमन्तो भजन्तेऽत्र धर्मार्थकामान् ॥ भजे० ॥ २ ॥

सुविज्ञानतोऽन्ये त्वया ज्ञानभूम्ना
स्वमात्मानमैक्य यतन्तेऽत्र नेतुम् ।
ससायुज्यमुक्तिः प्रियैवेति भावात्
तदन्या हि सालोक्यसारूप्यरूपा ॥ भजे० ॥ ३ ॥

अनेकत्वहानात्त्वदेकत्वसिद्धि-
स्तथैकत्वहानादनेकत्वबुद्धिः ।

अनेकान् भजन्ते सदेके सुतत्त्वे
निमित्तादुपाधेरविद्यात्ममासात् ॥ भजे० ॥ ४ ॥

न रूपं न नाम त्वयीष्टं यदेको-
ऽन्यथा त्वं सरूपः सनामा क्रियावान् ।
क्रिया ते जननां निदिध्यासनं स्यात्
तदद्वैतमाद्यं परं द्वैतमाहुः ॥ भजे० ॥ ५ ॥

यथा वा भवेत्तेऽस्तु तत्त्वं प्रियात्त्वां
स्तुवेऽहं समस्तं सदित्येव भावात् ।
शतानन्द विष्णोऽज शम्भो पुरारे
नितान्तं तवाहं भजे पादपद्मम् ॥ भजे० ॥ ६ ॥

न वाणी न सा मा न सोमा विभिन्ना
तवानादिशक्तिर्विभिन्नेव भाति ।
अतो वाक्पतिस्त्वं तथा श्रीपतिस्त्वं
तथोमापतिस्त्वं भजे त्वां सशक्तिम् ॥ भजे० ॥ ७ ॥

मृकण्डोः सुतं त्वं कृतान्तादरक्षीः
कथं त्वं नटस्थो मम प्रार्थनायाम् ।
सुरीन् बिभीषुं सुतं मां पितेव
प्रभो पाहि वेगात्तवाङ्घ्रिं प्रपन्नम् ॥ भजे० ॥ ८ ॥

शिवं शंकरं किंकरस्ते भजेऽहं
भवं नीलकण्ठं भवान्तं भजेऽहम् ।

मृडानीपते त्वं विडम्बं जहि त्वा
दृढं भक्तिभावान्मृड भावयेऽहम् ॥ भजे० ॥ ९ ॥

इमं सोमनाथस्तवं वेंकटार्यो-
ऽर्पयेऽहं पदे ते समाध्याद्यशक्तः ।
यथा भक्तिदत्तेन तोषोऽल्पकेन
स्वभावः प्रसादः प्रभावः सदा ते ॥ भजे० ॥ १० ॥

---

११. श्रीविश्वनाथस्तवः

(वृत्तम्—भुजङ्गप्रयातम)

भजे विश्वनाथं भजे विश्वनाथं
भजे विश्वनाथं भजे त्वां भजे त्वाम् ।
भजे देवनाथं भजे लोकनाथं
भजे भूतनाथं भजेऽहं भजेऽहम् ॥

भजे वारणार्मापतिं वारणास्य-
प्रिय वारणत्वक्कृतावारवासम् ।
भजे सान्नपूर्ण विशालाक्ष्युपेतं
भजे त्वां सगङ्गाभिषेकं सुतुष्टम् ॥ भजे० ॥ १ ॥

स्वतःसिद्धलिङ्गं पुराऽऽसीत्प्रसिद्धं
तदाऽऽसीददृश्यं कुतश्चिद्विचित्रम् ।
कृतं लिङ्गमेतत्पुनः सिद्धमासी-
दितीदृक्प्रतीकाभिमानो मुधाऽऽस्ते ॥ भजे० ॥ २ ॥

यतस्त्वं मनोऽगोचरस्तत्प्रतीकै-
रुपासः प्रतीकं भवेद्वस्तु किं वा ।
स्वभूतं कृता वा शिलाऽस्यां शिलात्वं
सदेकं सदीशे सदेकोऽस्ति भावः ॥ भजे० ॥ ३ ॥

अतो नामरूपाश्रयं त्वां सविश्वं
भजन्तेऽत्र विश्वेश्वराख्यं हि विश्वे ।

स्तुतैर्गीर्भिनोयैः सुपुष्पैः सुधूपैः
सुनैवेद्यताम्बूलनीराजनाद्यैः ॥ भजे० ॥ ४ ॥

नमन्ति स्तुवन्ति श्रियाऽऽराधयन्ति
प्रसन्नान्तरङ्गाः प्रपन्ना भवन्ति ।
प्रसन्नः प्रभो त्वं तदिष्टं वरिष्ठं
प्रदेहि द्रुतं दानशौण्डो दयालो ॥ भजे० ॥ ५ ॥

त्वमेको बहुर्भासि धुण्ड्येकदन्त-
स्तथा माधवो भैरवो दण्डपाणिः ।
तवानादिशक्तिस्तु दुर्गा च काशी-
भवानीह गङ्गा गुहा रत्नकर्णी ॥ भजे० ॥ ६ ॥

महाक्षेत्रकाश्यामिमा देवता ये
सुसदृश्य भक्त्या भजन्तीह भक्ताः ।
न तेषां जनिः स्याद्भवश्चिन्त्रवक्त्रे
स्वदेहेऽग्निदग्धे शिवं याति जीवः ॥ भजे० ॥ ७ ॥

मनोनिर्मलत्वं सुखेनैव गन्तुं
महातीर्थयात्रा परं साधनं स्यात् ।
ततस्तत्त्वबोधस्तदा मोक्षकाङ्क्षा
ततस्तत्त्वयोगस्तदा ब्रह्मभावः ॥ भजे० ॥ ८ ॥

उमानाथ विश्वेश विश्वासबन्धो
सदा दीनबन्धो दयापूर्णसिन्धो ।

ननं पाहि मां त्वं तवाहं करोमि
प्रमोदान्नमोवाकमत्यन्तभक्त्या ॥ भजे० ॥ ९ ॥

इमं विश्वनाथस्तवं प्रीतितस्ते
पदे वेंकटार्योऽर्पयेऽहं कृपालो ।
अनेनास्मि तुष्टो भवामीह हृष्टो-
ऽयमावयोः प्रीतिसंबन्धयोगः ॥ भजे० ॥ १० ॥

---

१२. श्रीवाणीनवमालिका

(वृत्तम—गीति)

विद्याशक्तिः शुद्धा
नित्या याऽग्रे सदाश्रया भाति।
वाग्रूपा वेदात्मा
साऽम्ब त्वमभूः सदात्मसंकल्पात् ॥ १ ॥

धातुर्भार्या भूत्वा
जाता मतिदाऽस्य सृष्टिकार्ये त्वम्।
कृतकृत्यः सर्वज्ञो
मानर्जातः स ते कररूपर्शात् ॥ २ ॥

भुवने जननि सुजातान्
तनयानमितान्सुबुद्धियुगर्दात्तान्।
सुखदात्री संचरसे
प्रीत्या बहुधा सुशिक्षितान्कर्तुम् ॥ ३ ॥

संस्कृतभाषारूपा
स्मृतिशास्त्रपुराणकाव्यसद्रूपा।
गीतादिकलारूपा
विद्यारूपा विभासि बहुरूपा ॥ ४ ॥

कविविद्वन्निकरैस्त्वं
मानसभवनेषु पूजिता पुष्टा।

चर्मसि त्वं निर्बन्धा-
द्वैर्यैर्हर्षान्मनःकुटीरे मे ॥ ५ ॥
कुलगोहित्यशरीरा
तर्कव्याकरणगन्धलिप्साङ्गा ।
मूर्तानिरुक्तश्रुतिकुसुमा
सिद्धमसि कवितासदन्नसंतुष्टा ॥ ६ ॥
तव मेधावशतो मे
कवितावुद्धिः सुनिर्मला जाता ।
किंतु त्वं दुर्दैवा-
देतावन्न प्रकाशिता जाता ॥ ७ ॥
उदयति सूर्ये प्रभया
धावति तिमिरं यथा तथाम्बाऽद्य ।
त्वयि राजितुमनसि मुदा
चेतोदैन्यं जहाति मां सत्यम् ॥ ८ ॥
अम्ब त्वं सुस्थिरवा
गच्छसि लोकान्मनःकुटीरान्मे ।
प्रियसुरभितवाक्कुसुमै-
र्ग्रथितां मालां समर्पये तुभ्यम् ॥ ९ ॥
अनया नवमालिकया
मुदिता संकल्पितया मया तुभ्यम् ।
पाण्ड्य वेंकटरमणं
तव तनयं मां सुखेन जननि त्वम् ॥ १० ॥

१३. कमलास्तुतिः

(वृत्तं—नाटकम्)

कमले विमले परमात्मकले
तव पादयुगं हृदि मे कलये ।
सकले[1] सुकले[2] सकलात्मकले
भवपातयुगं[3] पदि ते कलये ॥

सदने कमलं वदने कमलं
नयने कमलं चरणे कमलम् ।
तनये कमलं जनके कमलं
कमलानुगतं सकलं कमलम् ॥ १ ॥

जयमङ्गलदा जगतीहितदा
शुभमङ्गलदा सुदतीपतिदा ।
जनताविनतेः सुखिताऽश्रयदा
वनिताविनुतेर्मुदिता वरदा ॥ २ ॥

---

[1] सकला=मन्त्रशास्त्रप्रसिद्धश्रीविद्यादिकलाभिः सह वर्तत इति।

[2] सुकला=समीचीना कला (चतुःषष्टिः) यस्या सा ।

[3] भवे=संसारे, पाते=पातकारणे (जन्ममरणे), तयोर्युगं युग्ममित्यर्थः अथवा भवपाते=तापत्रयात्मकसंसारदुःखे कारणभूतं युगं, सुखदुःखपुण्यपापधर्माधर्मशीतातपादिसमस्तद्वन्द्वमित्यर्थः । अथवा भवपातः संसारदुःखमेव युगः=बन्धनं यस्य सः । तादृशं माम्, ते पदि कलये—तव पादे पातयामि, त्वत्पादमाश्रये इत्यर्थः ।

दिविजान् प्रणतान्सबलान् कुरुषे
दनुजान्समदानबलांस्तनुषे ।
मनुजान्मनुदानमृतान्नयसे
ननु जान् जननीव सुतं भज माम् ॥ ३ ॥

मतिदाऽऽस्यभुवे जयदांसभुवे
धनदोरुभुवे सुखदाऽङ्घ्रिभुवे ।
नयदा वटवेऽन्वयदा गृहिणे
दमदा वनिने शमदा यतये ॥ ४ ॥

असुदा जलदा बहुभूमिरुहे
वसुदा द्युतिदा वसुधान्तरुहे ।
तव चिन्मयशक्तिवशात् प्रसृता
प्रकृतेः परिणामगतिः प्रबला ॥ ५ ॥

विपिनं पवनादवितं भुवने
सरितस्तपनादविता भुवने ।
पतगः पतनाद्विभृतो गगने
महिमा तव विस्मयमातनुते ॥ ६ ॥

त्वदनुग्रहतो विधिवाग्विभुता
हरदक्प्रभुता हरिहृद्भवता ।
त्वमतोऽभिहिता बहुधा भुवि गी-
र्गिरिजाऽपि रमा स्तुतनामरमे ॥ ७ ॥

त्वममुं कृपया परिपाहि सुत
किमु तद्गुरु ते गुरुमोहगतम् ।
जननी तनयं न परं मनुते
न मनुं किमपि स्वहृदा कलय ॥ ८ ॥

शरणागतसज्जनताभरणं
सतत प्रियकृत्सहज खलु ते ।
करुणामयि मय्यनुकम्पयसे
यदि, मां भर, मा त्यज मां, परमे ॥ ९ ॥

त्वमिद वचनं सुतभावयुत
श्रवण नय वेकटनामकृतम् ।
शिशुना कलिता कलवाङ्मधुरा
मनुते सुतवत्सलतो जननी ॥ १० ॥

१४. गिरिजास्तुतिः

(वृत्तं—गुणभूषा)

गिरिजेऽलं सुरजालं भजते त्वाऽसुरजालं
वरजेऽल नरजालं नमति त्वामरिजालम् ।
वरलीलागुणजाले हृदये त्वां कलयेऽहं
वरलोलाकृतिजालं हर मे त्वं भवजालम् ॥

सगणेशे सुकुमारे सुकुमाराङ्गि कुमारे
जितमारे हतमारे कुरुषे त्वं हितमारम् ।
सुसमाराधितमाराद्धितचारं बहुशूरं
परवीर पुरवीराहितवैरं त्वयि धीरम् ॥ १ ॥

नरलोकेऽधरलोके सुरलोके परलोके
हरलोके हरिलोके विधिलोकेऽखिललोके ।
सुखकाङ्क्षा जनताया न कदाचिद्भवतीष्टा
पदसेवाकृतलाभो हतलोभो यदि ते स्यात् ॥ २ ॥

वनजालंकृतपीठे वनमालाधरकण्ठे
वनमालातलनिष्ठे हितशक्तिस्तव शक्त्या ।
स्तुतवाणी हितपद्मा प्रियगौरी त्वमितीत्थं
जगतीसर्जनरक्षालयकार्येषु निदानम् ॥ ३ ॥

श्रुतयो वा स्मृतयो वा तव तत्त्वं न विदन्ति
त्वमतीता खलु वाचां मनसोऽपि प्रथितैवम् ।

ऋषयो वा मुनयो वा मनसा चेत्तपसा त्वा-
मपरोक्षां कृतवन्तोऽनुभवन्ति ह्यमृतत्वम् ॥ ४ ॥

क्षितिरूपे जलरूपेऽनलरूपेऽनिलरूपे
सुखरूपे[1] चिद्रूपा लससि त्वं सकलात्मा ।
प्रथमस्य[2] प्रथमेति प्रथिताऽम्बाऽसि यथा त्व
निखिलं सान्तमिहास्ति त्वमनन्तासि तथैका ॥ ५ ॥

सदसद्रूपमनेकं निजसद्रूपवदेकं
मतिरेव विबुधानामपि तत्त्वे न हि सिद्धा ।
यदि जाता मतिरेषा स पुमान् याति पदं ते
सुखरूपं पररूपं न यतोऽन्यत्परमास्ते ॥ ६ ॥

रशनायां भुजगीधीरिह यावत्परमास्ते
न हि तावद्भयशोकौ विजहीतो मतिहीनम् ।
रशनाधीः सुदृढा चेद्भुजगीधीभ्रमहाना-
द्भयशोकौ सुविलीनौ भवतोऽतः सुसुखी स्यात् ॥ ७ ॥

जगतीयं जनताऽम्ब स्वसुखेच्छावशतस्ते
त्रिगुणात्ताः शुभमूर्तीः स्वभिधानैर्भजतेऽलम् ।

---

[1] समीचीनं च तत् खं च, तद्रूपे—प्रथमगुरुमहाकाशरूपे इत्यर्थः ।

[2] प्रथमः = प्रथमजः हिरण्यगर्भः, तस्मादपि प्रथमा—ब्रह्मणः संकल्प-रूपा वाग्रूपा वा त्वमिति भावः । "सोऽकामयत, बहु स्यां प्रजायेये"ति श्रुतिः ।

बहुसौभाग्यकरी त्वं स्वहितेति प्रतिपद्ये
शुभदे त्वं हि शिवानी वरदे त्व हि भवानी ॥ ८ ॥

करुणा ते करुणाब्धे भजतान्मामतिदीनं
भरणं मे त्वदधीन शरण त्वामिह याभि ।
जननी त्व तनुजोऽहं सुगुणा त्वं विगुणोऽह
परिपाहि प्रणुते मां करवाणि प्रणतिं ते ॥ ९ ॥

गिरिजायाः स्तुतिरेषा रचिताऽऽस्ते त्वयि भक्त्या
सुखदे वेंकटनाम्ना तव सेवानिरतेन ।
श्रुतिबोधः स्मृतिबोधो न हि मे मातरतः किं
श्रवण पुत्रकथाया जननीकार्यमिदं ते ॥ १० ॥

---

१५. श्रीगङ्गाष्टकम्

(वृत्तम्—स्रग्विणी)

अङ्गनामङ्गल मङ्गलाशासन
तुङ्गशृङ्गाश्रयं शृङ्गचन्द्राश्रयम् ।
भङ्गकैर्वल्गितं वल्गु तेजोबलं
गां गतं गाङ्गकं स्वान्तरङ्गे भजे ॥ १ ॥

सुन्दराद्रीन्द्रभूकन्दरात्स्यन्दनात्
-[1]स्यन्दनानन्ददं ददमाध्वानितम् ।
[2]मन्दवातेन्दुभाकुन्दगन्धाढ्यग
सिन्धुबन्धुप्रियं बन्धुराम्भो भजे ॥ २ ॥

बादरीभूमिगां श्रीहरिद्वारगां
[3]कर्णपूरञ्चितां सत्प्रयागे पराम् ।
यामुनासङ्गतो गुप्तसारस्वती-
सङ्गमास्त्वां त्रिवेणीं पुराणीं भजे ॥ ३ ॥

वारणासीपुरे पूर्वगा जाह्नवि
त्वं शिवे पाहि मां पापसमोचिनी ।

---

[1] स्यन्दनेन रथनि:सरणेन गः आनन्द. जायते तदानन्ददमित्यर्थ. ।

[2] शैत्यसौरभ्यमान्द्यादि गुणाः वायौ कविभि सामान्येन ये वर्ण्यन्ते ते गावें गङ्गाजले वर्तन्त इति अनुभवस्मारकमेतत् ।

[3] कर्णपू:--कर्णपुरम्, कानपूरिति प्राकृतभाषायां प्रसिद्धम् ।

[1]यात्यसी पूर्वतो [2]वारणा पश्चिमात्
गाङ्गतोये स्वयं स्नातुमासक्तिगा ॥ ४ ॥

मागधे पुण्यभूभूरिभूपादरा-
द्वङ्गदेशं गता तत्र साहस्रधा ।
नीरधाराश्रिताऽलंकृता स्वप्रियं
प्राप्तवं सागरं सोत्सुका सङ्गता ॥ ५ ॥

वामतो रामगङ्गापगा त्वां श्रिता
गोमती श्रीसरय्वापगा कूर्मगा ।
गण्डकी कौशिकी माद्र्यनेकापगाः
सख्यभावेन ते सङ्गमाद्भिन्नताः ॥ ६ ॥

सर्वतः शर्मदा शर्मणी संश्रिता
चारुशोणापगा त्वां प्रियात्सङ्गता ।
भारतोज्जीविनी देवता त्वं भुवं
सस्यभूयोज्ज्वलां तन्वती मोदसे ॥ ७ ॥

स्नानपानार्चनध्यानवासार्थिनां
शुद्धिदा तृप्तिदा खेष्टदा मोक्षदा ।
सौख्यदा त्वां भजे पाहि मामर्मकं
देवि गङ्गे मुदा मातृभूता सदा ॥ ८ ॥

१, २ एते गङ्गागमिन्यौ वाराणस्याप्रान्ते प्रवहन्त्यौ नदीविशेषाविति मन्तव्यम् ।

चन्नरायाह्वये पत्तने जन्मवान्
वेंकटार्याह्वयो हेऽम्ब गङ्गाष्टकम् ।
क्षेत्रयात्रागतो गाङ्गतीरं गतो
दैवसंप्रेरितो भक्तितस्तेऽर्पये ॥ ९ ॥

250-36 —" बेंगळूर् प्रेस " इत्याख्य आर्यसाधर मुद्रण यन्त्रालये कार्यनिवाहकः
जि. श्रीनिवासराव एतैः मुद्रितम् ॥